महावि० का नाम
आ० वि० सं० महावि० रहीमपुर, खगड़िया।
9.00 दिनाङ्क - 5.12.2020
उपशास्त्री द्वितीय वर्ष
10.00 व्याकरण (भाग १०)

विषय - बहुव्रीहि समास प्रकरणम्।

11.00 शेषो बहुव्रीहिः। अधिकारोऽयं। 'द्वितीयाश्रित'-
इत्यादिना यस्य त्रिकस्य विधिर्न समासो
12.00 नोक्तः स शेषः प्रथमान्तमित्यर्थः। 'अनेक-
मन्यपदार्थे'। अनेकं प्रथमान्तमन्यपदार्थे वर्त-
1.00 मानं वा समस्यते स बहुव्रीहिः। अप्रथमा
विभक्त्यर्थे बहुव्रीहिरिति समानाधिकरणा-
2.00 नामिति च फलितम्। प्राप्तमुदकं यं स प्राप्तोदको
ग्रामः। ऊढरथोऽनड्वान्। उपहृतपशू रुद्रः।
3.00 उद्धृतौदना स्थाली। पीताम्बरो हरिः। वीर-
पुरुषको ग्रामः। प्रथमार्थे तु न। वृष्टे देवे गतः।
4.00 व्यधिकरणानामपि न। पञ्चभिर्भुक्तमस्य। प्रादिभ्यो
धातुजस्य वाच्यो वा चोत्तरपदलोपः। प्रपतित-
5.00 पर्णः प्रपर्णः। 'नञोऽस्त्यर्थानां वाच्यो वा
चोत्तरपदलोपः' अविद्यमानपुत्रः अपुत्रः। अव्य-
6.00 यानां च' उच्चैर्मुखः। 'सप्तम्युपमानपूर्वपदस्यो-
त्तरपदलोपश्च'। सप्तम्यन्तम् उपमानं च
7.00 पूर्वपदं यस्य तस्य पदान्तरेण समास उत्तर
पदलोपश्च भवतीत्यर्थः। कण्ठेस्थः कालो
यस्य स कण्ठेकालः। उष्ट्रमुखमिव मुखं
यस्य स उष्ट्रमुखः। 'सङ्घातविकारषष्ठ्याश्चोत्तर-
पदलोपश्च' केशानां सङ्घातश्चूडा यस्य स
केशचूडः, सुवर्णस्य विकारः अलङ्कारो यस्य
NOTES स सुवर्णालङ्कारः। 'अस्तिक्षीरादयश्च'। अस्तीति
विभक्तिप्रतिरूपकमव्ययम्। अस्ति क्षीरा गौः।
'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे

Scanned with CamScanner

स्त्रियामपूरणीप्रियादिषु'। भाषितपुंस्कादनूङ् ऊङोऽभावो-
ऽस्यामिति बहुव्रीहिः। निपातनात्पञ्चम्या अलुक्,
षष्ठ्याश्च लुक्। तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुंस्कं
तस्मात्पर ऊङोऽभावो यत्र तथाभूतस्य स्त्रीवाचकस्य
शब्दस्य पुंवाचकस्येव रूपं स्यात् समानाधिकरणे
स्त्रीलिङ्गे उत्तरपदे, न तु पूरण्यां प्रियादौ च परतः। गोस्त्रियोः
-रिति ह्रस्वः। चित्रा गावो यस्येति लौकिके विग्रहे 'चित्रा
अस् गो अस्' इत्यलौकिकविग्रहे चित्रगुः। रूपवद्भार्यः।
चित्रा जरती गौर्यस्येति विग्रहे अनेकोक्तेर्बहूनामपि
बहुव्रीहिः। अत्र केचित् — चित्राजरतीगुः, जरतीचित्रा
गुः। एवं दीर्घातन्वीजङ्घः, तन्वीदीर्घाजङ्घः। त्रिपदे
बहुव्रीहौ प्रथमे न पुंवत्। उत्तरपदस्य मध्यमेन व्यव
धानात्। द्वितीयमपि न पुंवत् पूर्वपदत्वाभावात्। उत्तर
पदशब्दो हि समासस्य चरमावयवे रूढः। पूर्वपद
शब्दस्तु प्रथमावयवे रूढ इति वदन्ति। वस्तुतस्तु नेह
पूर्वपदमाक्षिप्यते। 'आनङ् ऋतः' — इत्यत्र यथा।
तेनोपान्त्यस्य पुंवदेव। चित्राजरद्गुः इत्यादि।
अत एव 'चित्राजरत्यौ गावौ यस्येति द्वन्द्वगर्भेऽपि
चित्राजरद्गुः' इति भाष्यम्। कर्मधारयपूर्वपदे
तु द्वयोरपि पुंवत्। जरच्चित्रगुः। कर्मधारयोत्तरपदे
तु चित्राजरद्गवीकः। स्त्रियाः किम् — ग्रामणि कुलं
कुटुम्बस्य ग्रामणिदृष्टिः। भाषितपुंस्कात् किम् —
गङ्गाभार्यः। अनूङ् किम् — वामोरूभार्यः। समाना-
धिकरणे किम् कल्याण्या माता कल्याणीमाता।
स्त्रियां किम् कल्याणी प्रधानं यस्य स कल्याणी-
प्रधानः। पूरण्यां तु — अप्पूरणीप्रमाण्योः। पूरणार्थ-
प्रत्ययान्तं यत्स्त्रीलिङ्गं तदन्तात्प्रमाण्यन्ताच्च बहुव्रीहेः
अप् स्यात्।

दिनेश प्र० सिंह
(जूनियर प्रोफेसर)
(व्याकरण)

Scanned with CamScanner